# संस्कृत वार्ताः

**दिनाङ्क :-18.12.2024** **प्रात: - 06:55**

## अथ वार्ताः

### राष्ट्रपतिः - हैदराबादनगरम्

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य हैदराबादनगरस्य बाह्यक्षेत्रे बोलारमस्थले राष्ट्रपति-निलयम इत्यत्र विभिन्नानाम् उपक्रमाणाम् उद्घाटनं शिलान्यासं च करिष्यति। तदनु राष्ट्रपतिः श्वः सिकन्दराबादस्य रक्षाप्रबन्धनमहाविद्यालयाय राष्ट्रपतिध्वजं प्रदास्यति । तस्मिन् एव दिने सायंकाले राज्यस्य गणमान्य-जनेभ्यः प्रमुखेभ्यः नागरिकेभ्यः शिक्षाविद्भ्यश्च राष्ट्रपति- निलयम इत्यत्र औपचारिकं स्वागतं करिष्यते । ह्यः राष्ट्रपतिः द्रौपदीमुर्मुः पञ्चदिवसीय-दक्षिणप्रवासाय राष्ट्रपतिनिलयमं सम्प्राप्तवती ।

### डोभाल-चीनवार्ताः

राष्ट्रियसुरक्षापरामर्शदः अजीतडोभालः अद्य चीनदेशस्य बीजिंगनगरे भारत-चीन-देशयोः विशिष्ट-प्रतिनिधीनां वार्तायां भागं स्वीकरिष्यति। अस्याः विशेषवार्तायाः उद्देश्यं पूर्वीय- लद्दाख- क्षेत्रे सैन्यगतिरोधस्य कारणात् चतुर्वर्षाणि यावत् अवरुद्धानां सम्बन्धानां पुनरुद्घाटनमिति वर्तते। श्रीडोभालः स्वीयेन चीनदेशीयेन समकक्षेण विदेशमन्त्रिणा च वांग-यी इत्यमुना साकं विशेषप्रतिनिधिनां त्रयोविंशतितमस्य चरणस्य विधास्यति। अस्याः महत्वपूर्णवार्तायाः प्राक् चीनदेशेन ह्यः सूचितं यत् अक्टूबरमासे चतुर्विंशतिदिनाङ्के ब्रिक्सशिखरसम्मेलनावधौ रूसदेशस्य कजाननगरे निजोपवेशनसमये प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपति- शी- जिनपिङ्ग इत्यनयोः मध्ये समुत्पन्न-सामान्य-अवधारणायाः आधारे प्रतिबद्धतानां क्रियान्वनाय चीनदेशः भारतेन सह कार्यं कर्तुं सज्जोवर्तते।

### श्रीलङ्का – पारगमनानुमतिपत्रम्

पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य जनवरीमासात् श्रीलङ्कादेशं गन्तुं निःशुल्क – पारगमनानुमतिपत्र -प्राप्तानां नवत्रिंशद्देशानां नागरिकेषु भारतीयाः अपि भविष्यन्ति। नवदिल्ल्याम् इण्डिया- फाउण्डेशन इत्यनया संस्थया आयोजिते एकस्मिन् संवादकार्यक्रमे श्रीलङ्कादेशस्य विदेशमत्रिणा विजिता-हेराथ - इत्यनेन घोषणा इयं कृतास्ति। असौ कथितवान् यत् आगामिनि जनवरीमासे संसदीयराजपत्रसूचना प्रख्यापयिष्यते । यस्यान्तर्गतं श्रीलङ्कादेशः भारतं समेत्य नवत्रिंशद्देशेभ्यः निःशुल्करुपेण पारगमनानुमतिपत्रं प्रदास्यति ।

### रक्षामन्त्री राजनाथसिंहः

रक्षामन्त्री राजनाथसिंहः ह्यः नवदिल्ल्यां मन्त्रालयस्य परामर्श-समितेः सम्मेलनस्य अध्यक्षतां कृतवान् । एतस्मिन् सम्मेलने नूतनानां रक्षा-सार्वजनिकक्षेत्रस्य उपक्रमाणां भूमिकानां कार्याणां च चर्चा जाता । अपि च समिति-सदस्यानां कृते वित्तीय-अङ्कानां, आधुनिकीकरणस्य, मूलधन-व्ययस्य, निर्यातस्य, नूतन-उत्पादानां विकासस्य, वर्तमान-संशोधन-विकास-परियोजनानां विषये अपि सूचना दत्ता।

### रूस – मारितः सैन्य पुरुषः

मास्को-नगरे ह्यः विद्युद्-द्विचक्रिका-याने गुप्तविस्फोटकेन रूसदेशस्य-परमाणु-संरक्षण-बलस्य प्रमुखः सेनापतिः इगोर-किरिलोव इत्येषः सहायकेन सह मारितः। किरिल्लोव इत्येषः रूसदेशे हतः वरिष्ठतमः सैन्यपुरुषः अस्ति, तथापि युक्रेन्-देशे क्रेम्लिन-सैन्यस्य आक्रमणम् सम्प्रति अपि अनुवर्तते। विस्फोटनानन्तरं युक्रेन्-देशस्य सुरक्षा-सेवा अस्य आक्रमणस्य दायित्वं स्व्यकरोत् इति कथ्यते।

### क्रिकेटिति

महिलानां क्रिकेट्प्रतिस्पर्धायां ह्यः रात्रौ नवीमुम्बय्याः डीवाईपाटिल- क्रीडाङ्गणे द्वितीये महिलानां विंशतिप्रति विंशति- अन्ताराष्ट्रिय - द्वन्द्वे वेस्टइण्डिजदलेन भारतं नवस्तोभैः पराजित्य तिसृणां स्पर्धानां श्रृङ्खला एकम्-एकम् इत्यङ्केन समानं कृतम् । अन्तिमा स्पर्धा श्वः क्रीडिष्यते।

**।।इति वार्ताः।।**